"एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति यः केवलं देहम्भरः" ॥)

क्रान्तः, पुं, (क्रम्यते आक्रम्यते इति । क्रम + क्तः ।) घोटकः । इति त्रिकाण्डशेषः ॥ (पादेन्द्रियम् । यथा, मनौ । १२ । १२१ ।
"मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम् ।
वाच्यग्निं मित्रमुत्सर्गे प्रजने च प्रजापतिम्" ॥
"क्रान्ते पादेन्द्रिये विष्णुमिति" । कुल्लूकभट्टः ॥
भावे + क्तः । क्ली, आरूढ़म् । क्रमणम् । यथा माघे ।
"क्रान्तं रुचा काञ्चनवप्रभाजा" ॥
यथा च शतपथब्राह्मणे ५ । ४ । २ । ६ ।
"विष्णोः क्रान्तमसीतीमे लोकाः विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तम्" ॥)
आक्रान्ते त्रि ॥

क्रान्ता, स्त्री, (क्रम + कर्त्तरि क्त । स्त्रियां जातित्वेपि संयोगोपधत्वात् टाप् ।) वृहती । इति राजनिर्घण्टः ॥

क्रान्तिः, स्त्री, (क्रम + भावे क्तिन् ।) खगोलमध्यवर्त्तिसूर्य्यगमनार्थतिर्य्यग्गोलरेखा । यथा,—
"अयनादयनं यावत् कक्षा तिर्य्यक् तथापरा ।
क्रान्तिसंज्ञा तया सूर्य्यः सदा पर्य्येति भासयन्" ॥
इति सूर्य्यसिद्धान्ते गोलाध्यायः ॥ "नाड़ीमण्डलात् दक्षिणोत्तरं क्रान्तिमण्डलावधियदन्तरं तत्" । इति तट्टीकायां नृसिंहविदाम्बरः ॥ तत्पर्य्यायः । अपमण्डलम् २ अपवृत्तम् ३ अपक्रमः ४ अपक्रान्तिः ५ । इति सूर्य्यसिद्धान्तः ॥ अपमः ६ । इति सिद्धान्तशिरोमणिः ॥ इष्टक्रान्त्यानयनक्रमो यथा,—
"परमापक्रमज्या च सप्तरन्ध्रगुणेन्दवः ।
तद्गुणाज्या त्रिजीवाप्ता तच्चापक्रान्तिरुच्यते" ॥
इति सूर्य्यसिद्धान्तः ॥ * ॥ आक्रमः । इति हेमचन्द्रः ॥ गतिः । गत्यर्थात् क्रमधातोर्भावे क्तिन्प्रत्ययात् तथात्वम् ॥

क्रान्तिवलयः, पुं, (सूर्य्यसिद्धान्तोक्ता क्रान्तिरेव वलयः वृत्तम् ।) क्रान्तिमण्डलम् । विषुवद्वृत्तात् चतुर्विंशतिभागैर्दक्षिणे चोत्तरे यद्वृत्तं तत् । इति सिद्धान्तशिरोमणिः ॥

क्रान्तुः, पुं, (क्रामतीति । "क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्चेति" । उणां ५ । ४३ । इति तुन् वृद्धिश्च ।) पक्षी । इत्युणादिकोषः ॥

क्रायकः, पुं, (क्रीणाति इति । कर्त्तरि ण्वुल् ।) क्रेता । इत्यमरः ॥ क्रयजीवी । इत्यमरटीकायां भरतः ॥

क्रिमिः, पुं, (क्रमु पादविक्षेपे । "क्रमितमिशतिस्तम्भामत इच्च" । उणां ४ । १२१ । इति इन् कित् अत इच्च ।) कीटः । कृमामयः । इत्यमरटीकायां भरतः ॥ रोगविशेषः । तस्य प्रकारो यथा,—
"क्रिमयस्तु द्विधा प्रोक्ता वाह्याभ्यन्तरभेदतः ।
वहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्व्विधाः ॥
नामतो विंशतिविधा वाह्यास्तत्र मलोद्भवाः ।
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ॥
वहुपादाश्च सूक्ष्माश्च यूका लिख्याश्च नामतः ।
द्विधा ते कोठपिड़का कण्डूगण्डान् प्रकुर्व्वते ॥*॥

निदानम् यथा ।
"अजीर्णभोजी मधुराम्लनित्यो
द्रवप्रियः पिष्टगुड़ोपभोक्ता ।
व्यायामवर्जी च दिवाशयानो
विरुद्धभुक् संलभते क्रमींश्च" ॥

पुरीषजनिदानं यथा,—
"मांसपिष्टान्नलवणगुड़शाकैः पुरीषजाः" ॥ * ॥

कफजनिदानं यथा,—
"मांसमाषगुड़क्षीरदधिशुक्तैः कफोद्भवाः" ॥

रक्तजनिदानं यथा,—
"विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि" ॥

अभ्यन्तरक्रिमिलक्षणं यथा,—
"ज्वरो विवर्णता शूलं हृद्रोगश्छर्द्दनं भ्रमः ।
भक्तद्वेषोऽतिसारश्च संजातक्रिमिलक्षणम्" ॥

कफजरूपं यथा,—
"कफादामाशये जाता वृद्धाः सर्पन्ति सर्व्वतः ॥
पृथुब्रध्ननिभाः केचित् केचिद्गण्डूपदोपमाः ।
रूढ़धान्याङ्कुराकारास्तनुदीर्घास्तथाणवः ॥
श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते ।
अन्त्रादा उदरावेष्टा हृदयादा महागुदाः ॥
चुरवो दर्भकुसुमाः सुगन्धास्ते च कुर्व्वते ।
हृल्लासमास्यस्रवणमविपाकमरोचकम् ॥
मूर्च्छाच्छर्द्दिज्वरानाहकार्श्यक्षवथुपीनसान्" ॥ * ।

रक्तजरूपं यथा,—
"रक्तवाहिशिरास्थाना रक्तजा जन्तवोऽणवः ॥
अपादा वृत्तताम्राश्च सौक्ष्म्यात् केचिददर्शनाः ।
केशादा रोमविध्वंसा रोमद्वीपा उडुम्बराः ॥
षट् ते कुष्ठैककर्म्माणः सहसौरसमातरः" ॥

विड्जरूपं यथा,—
"पक्वाशये पुरीषोत्था जायन्तेऽधोविसर्पिणः ।
वृद्धास्ते स्युर्भवेयुश्च ते यदामाशयोन्मुखाः ।
तदास्योद्गारनिश्वासविड्गन्धानुविधायिनः ॥
पृथुवृत्ततनुस्थूलाः श्यावपीतसितासिताः ।
ते पञ्च नाम्ना क्रिमयः ककेरुकमकेरुकाः ॥
सौसुरादाः सशूलाख्या लेलिहा जनयन्ति हि" ॥

विमार्गगक्रिमिलक्षणं यथा,—
"विड्भेदशूलविष्टम्भकार्श्यपारुष्यपाण्डुताः ।
रोमहर्षाग्निसदनगुदकण्डूर्विमार्गगाः" ॥
इति माधवकरः ॥

(अस्य सहेतुकलक्षणचिकित्सितानि यथा,—
"इह खल्वग्निवेश विंशतिविधाः क्रिमयः पूर्व्वमुक्ता नानाविधेन प्रविभागेनान्यत्र सहजेभ्यः । ते पुनः प्रकृतिभिर्भिद्यमानाश्चतुर्व्विधास्तद्यथा । पुरीषजाः श्लेष्मजाः शोणितजाः मलजाश्चेति । तत्र मलो वाह्यश्चाभ्यन्तरश्च । तत्र वाह्ये मले जातान् मलजान् सञ्चक्ष्महे, तेषां समुत्थानं मृजावर्ज्जनं, स्थानकेशश्मश्रुलोमपक्ष्मवासांसि, संस्थानमणवस्तिलाकृतयो वहुपादा वर्णः कृष्णः शुक्लश्च, नामानि यूकाः पिपीलिकाश्चेति, प्रभावः कण्डूजननं कोठपिड़काभिनिर्व्वर्त्तनञ्च, चिकित्सितं त्वेषामपकर्षणं मलोपघातो मलकराणाञ्च भावानामुपसेवनमिति । शोणितजानान्तु कुष्ठैः समानं समुत्थानं, स्थानं रक्तवाहिन्यो धमन्यः, संस्थानमणवो वृत्ताश्चापादाश्च सूक्ष्मत्वाच्चैके भवन्त्यदृश्याः, वर्णस्ताम्रः, नामानि केशादा लोमादा लोमद्वीपाः सौरसा औदुम्बरा जन्तुमातर इति । प्रभावः केशश्मश्रुनखलोमापध्वंसो व्रणगतानाञ्च हर्षकण्डूतोदसंसर्पणान्यवृद्धानाञ्च त्वक्सिरास्नायुमांसतरुणास्थिभक्षणमिति, चिकित्सितमप्येषां कुष्ठैः समानं तदुत्तरकालमुपदेक्ष्यते ।

श्लेष्मजाः क्षीरगुड़तिलमत्स्यानूप-मांस-पिष्टान्न-परमान्नकुसुम्भस्नेहाजीर्ण-पूतिक्लिन्नसङ्कीर्ण-विरुद्धासात्म्यभोजनसमुत्थानाः । तेषामाशयः स्थानं प्रवर्द्धमानास्तूर्द्धमधो वा विसर्पन्ति, उभयतो वा । संस्थानवर्णविशेषास्तु श्वेताः पृथुब्रध्नसंस्थानाः केचित्, केचिद्वृत्तपरिणाहाः गण्डूपदाकृतयश्च श्वेतास्ताम्रावभासाः, केचिदणवो दीर्घास्तन्त्वाकृतयः श्वेताः । तेषां त्रिविधानां श्लेष्मनिमित्तानां क्रिमीणां नामानि, अन्त्रादा, उदरादा, हृदयादाश्चुरवो दर्भपुष्पाः, सौगन्धिकाः, महागुदाश्च इति । प्रभावो हृल्लासास्यसंस्रवणमरोचका विपाको ज्वरो मूर्च्छाजृम्भाक्षवथुरानाहोऽङ्गमर्द्दः छर्द्दिः कार्श्यं पारुष्यमिति ।

पुरीषजास्तुल्यसमुत्थानाः श्लेष्मजैस्तेषां स्थानं पक्वाशयः । प्रवर्द्धमानास्त्वधो विसर्पन्ति । यस्य पुनरामाशयाभिमुखाः स्युस्तदनन्तरं तस्योद्गारनिःश्वासाः पुरीषगन्धिनः स्युः । संस्थानवर्णविशेषास्तु सूक्ष्मवृत्तपरीणाहाः श्वेता दीर्घोर्णांशुकसङ्काशाः केचित् केचित् पुनः स्थूलवृत्तपरीणाहाः श्यावनीलहरित पीताः । तेषां नामानि ककेरुकमकेरुकाः लेलिहाः शालूवकाः सौसुरादाश्चेति । प्रभावः पुरीषभेदः कार्श्यं पारुष्यं लोमहर्षाभिनिर्व्वर्त्तनञ्च । तत्र वास्य गुदमुखं परितुदन्तः कण्डूञ्चोपजनयन्तो गुदमुखं पर्य्यासते । स जातहर्षो गुदान्निष्क्रमणमतिवेलं करोति ।

इत्येषश्लेष्मजानां पुरीषजानाञ्च क्रिमीणां समुत्थानादिविशेषः । चिकित्सितन्तु खल्वेषां समासेनोपदिश्य पश्चाद्विस्तरेणोपदेक्ष्यते । तत्र सर्व्वक्रिमीणामपकर्षणमेवादितः कार्य्यम् । ततः प्रकृतिविघातोऽनन्तरं निदानोक्तानां भावानामनुपसेवनमिति ।

तत्रापकर्षणं हस्तेनाभिगृह्यापनयनमुपकरणवतानुपकरणेन वा । स्थानगतानान्तु क्रिमीणां भेषजेनापकर्षणं न्यायतश्चतुर्विधमिति । तद्यथा,—शिरोविरेचनं वमनं विरेचनमास्थापनमित्यपकर्षणविधिः ।

प्रकृतिविघातस्त्वेषां कटुतिक्तकषायक्षारोष्णानां द्रव्याणामुपयोगो यच्चान्यदपि किञ्चित् श्लेष्मपुरीषप्रत्यनीकभूतं तत्स्यादिति प्रकृतिविघातः ।

अनन्तरं निदानोक्तानां भावानामनुपसेवनम् । यदुक्तं निदानविधौ, तस्य वर्ज्जनं तथाविध-